© 2015 IJSRSET | Volume 1 | Issue 3 | Print ISSN : 2395-1990 | Online ISSN : 2394-4099

# महामारते सदाचार कल्पना



**डॉ० नवनीता**
**A-21, बैंकमेन्स कॉलोनी,**
**चित्रगुप्तनगर, कंकरबाग**
**पटना, बिहार, भारत**

**सारांश:** - महाभारतम् इतिहासकाव्यम् वर्तते। महाभारतस्य विषये इदं प्रसिद्धं वर्तते यत् – यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्। महाभारते कथामाध्यमेन नीति–कुटनीति–उपदेश–सदाचारादय: अनेका: विषया: वर्णिता: सन्ति।

**प्रमुखशब्दा: - महाभारतम्, सदाचार:, व्यास:, मनुस्मृति:, आचरणम्, सज्जन:, दुर्जन: इत्यादय:।**

---

मनुस्मृतौ सदाचार: धर्मस्य तृतीयं लक्षणम् इति निरूपितम् तथाहि तस्या: स्मृते: द्वितीयाध्याये धर्मस्य लक्षणमित्थं प्रतिपादितमस्ति–

**वेद: स्मृति: सदाचार स्वस्य च प्रियमात्मन:।**
**एतच्चतुर्विधं प्राहु: साक्षाद्धर्मस्या लक्षाणम्।।** [1]

अत्र लक्षण' शब्दस्य प्रमाणं स्रोता: आधार: वा अर्थ: कल्पनीय:। उपर्युक्तानि चत्वारि धर्मस्य स्रोतांसि मूलानि वा सन्ति। वेदशब्देन तदङ्गगतस्य कल्पस्य अङ्गभूतं धर्मशास्त्रं बुध्यते। एवमेव स्मृतिशब्देन मन्वादीनाम् ऋषीणा स्मृतय: ज्ञायन्ते। 'सदाचार' शब्देन च महापुरुषाणां साधूनां च आचरणं जानन्ति विद्वांस:। मनुस्तु प्रसंगेऽस्मिन ब्रह्मावर्तस्य प्रदेश–विशेषस्य लक्षणं विद्याय तस्मिन् देशे स्थितं शिष्टाचारम एव सदाचारशब्देन निरूपयति। तत् प्रमाणभूतौ श्लोकौ उदाह्रियेते –

**सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम्**
**तं देवनिर्मित देशं ब्रह्मावर्तं प्रचक्षते।**
**तस्मिन्देशे य आचार: पारम्पर्यक्रमागत:**
**वर्णानां सान्तारालानां स सदाचार: उच्यते ।।** [2]

यद्यपि मनु: दैशिकमाचारमेव सदाचार इति मन्यते तथापि सदाचारे देश: अकिञ्चित्कर: तुच्छ इति यावत्। वस्तुत: धार्मिक: क्रियाकलाप: लोककल्याणकर: साधुभि: आचारित: एव सदाचार: इति तस्य व्याप्ति:। स्वयं मनु: अन्यत्र (2.6) कययति धर्मलक्षणे "आचारश्चैव साधूनाम् आत्मनस्तुतिटरेव च। अत: सतामाचार: सदाचार: इत्येव व्युत्पत्ति–निमित्तेव

प्रवृत्तिनिमित्तम् इह ज्ञातव्यम्। एते सन्तः सज्जना वा यादृशमाचरन्ति यत्र कुत्रापि देशे भवन्तु स एव सदाचारशब्देन ज्ञायते।

विभिन्नेषु ग्रन्थेषु सदाचारस्य लक्षणपूर्वकं विवरणं लभ्यते। महाभारतं तु चतुर्णां पुरुषार्थान शास्त्रग्रन्थः इति विदितमेव। तत्र धर्मशास्त्रविषयोऽपि अत्र अस्त्येव। अतः धर्मशास्त्राङ्गरूपः सदाचारोऽपि विस्तरेण विवेचितोऽत्र इति स्वाभाविकम्। अनुशासनपर्वणि आचारस्य लाक्षणमित्थं निगदितम् –

**साधूनां च यथावृतमेतदाचार लक्षणम्।**[3]

अन्यत्र तस्मिन्नेव पर्वणि दुराचारशिष्टाचारयोः भेदो निरूपित यथा–

**दुराचारावच दुर्धर्षा दुर्मुखाश्चाव्यसाधवः।**

**साधवः शीलसम्पन्नाः शिष्टाचारस्य लक्षणम् ॥** [4]

समाजे ये साज्जनाः धर्मात्मानः इति ज्ञायन्ते तेषामेव आचारणंसदाचारः। तेषामपि सर्वाणि आचारणानि न प्रमाणभूतानि भवन्ति। एकैकेन मानवेन प्रमादः कर्तुं शक्यते। यदा कदा अधार्मिकमपि क्रियाकलापं पश्यामः साधनामपि। अतः शास्त्रविहितं श्लाध्यमेव आचरणं शिष्टाचारकोटौ ग्रहर्णायम्।

शास्त्रमर्यादामति कभ्य यत्रस्वैरवृत्त्या आचारणं विधीयते तत् कथमपि सदाचारकोटौ न प्रविशति। यथा युधिष्ठिरः सदाचारी भूत्वापि द्रोणाचार्यस्य निधनाय मिथ्याचरणं, सम्पादितवान् तथा 'अश्वत्थामा हतः' इति मिथ्या भाषणं कृतवान् येन द्रोणः विषण्णः बभूव। एवमाचरणं युधिष्ठिरस्यापि न सदाचार : इति भाषितुं शक्यते। अतएव अनुशासनपर्वणि घोषितमस्ति यत् –

**प्रमाणामप्रमाणं वै यः कुर्यादबुधो जनः**

**न स प्रमाणतामर्हेद् विवादजननो हि सः।।**

सदाचारस्य फलं पुण्यरूपं भवति इति महाभारतमपि घोषयति। स्वकीयेन सदाचारेण मानवः दीर्घायुर्भवति। लोके परलोके च धनमैश्वर्यं कीर्तिं च लभते।

अपरत्र दुराचारी जनः दुःखी अल्पायुश्च जायते। अतो भूतये विभूतये च मानवेन सदा शुद्धाचरणं विधेयम्।

आधारहीनं तु पण्डितमपि जहाति लोकः। उक्तं च–'**आचारहीनं न पुनन्ति वेदाः**' इति

सदाचारसम्पन्नस्य पुरुषस्य अनुकरणं कुर्वन्ति जनाः। तेन लोके सामंजस्यं जायते लोककल्याणं च भवति। केचन सदाचाराः दैनिककृत्यरूपेण वर्णिताः। महाभारते विभिन्नेषु धर्मशास्त्रीयग्रन्थेषु च यथा ब्रह्मे मुहूर्ते शय्यात्यागः, यथेष्ट देवतानां प्रातः स्मरणम् यथाविधि शौचादिनिवृत्तिः, दन्तधावनम् स्नानम्, देवोपासनम् इच्यादयः। एतानि सर्वाणि कार्याणि पूर्वाह्ले एव सम्पादनीयानि। अतिथीनां सेवनं याथासाध्यं करणीयम्। एवमेव गुरुणां सत्कारः स्ववृत्तिपालनं सभ्यक् विधेयम्। यथायोग्यं श्रमेण अप्रमादेन च सर्वं निर्धारितं कर्म सम्पादनीयम्।

कस्यापि जनस्य ऐश्वर्याय न ईर्ष्या करणीया। आर्तस्य कष्टनिवारणं यथा भवेत् तथा यथासाध्यं प्रयतेत।[6] वनपर्वणि द्विजव्याधसंवादे[7] यक्षयुधिष्ठिरसंवादे[8] दुर्गातितरणाध्याये[9] च सदाचारविषये विपुलः प्रकाशः लभ्यते।

अपि च चतुराश्रमव्यवस्थायामपि यत्र गृहस्थधर्माः निरूपिताः तेऽपि सदाचारः इति कथ्यन्ते। वस्तुतः येषां कर्मणां पालनेन स्वकल्याणं परकल्याणं च भवेत्, न कस्यापि हानिः स्यात् तानि तानि कर्माणि सदाचारस्य अन्तर्गतानि सन्ति। महाभारते बहुषु उपाख्यानेष्वपि सदाचारस्य उपदेशाः वर्तन्ते।

सदाचारस्य सम्पादने पालने वा बाह्यं शौच प्रशस्यते किन्तु बाह्यशौचापेक्षया अन्त: शौचम् अर्थात् मन: शौचं विशिष्यते। वस्तुत: मन: शुद्धिरेव वास्तविकी शुद्धि : वर्तते। यदि आन्तरिकं चरित्रं शुद्धं नास्ति तथा बाह्यरूपेण सदाचारस्य पालनं क्रियते, तदा पाखण्डमात्रं तत्।

महाभारतकाले वेदादि शास्त्रेषु विहितानां साध्वाचाराणां पालका: आर्या: इति कथ्यन्ते स्म। तद्विपरीता: ये आचरणवन्त: आसन् ते आचार्या: इति ज्ञायन्ते स्म। एवं सदाचास्य अनाचारस्य च ग्रहणेन आर्यानार्ययो: विभाजनं भवति स्म। यथोक्तं महाभारते-वृत्तेन हि भवत्यार्यो न धनेन न विद्यया।[11]

एवमेव अनार्यत्वमनाचार: इत्यपि अनुशासनपर्वणि (48-41) प्रतिपादितमस्ति। अधुना 'आर्यानार्य' शब्दयो: ऐतिहासिका: वर्गविशेषेण बोधं कुर्वन्ति; किन्तु महाभारते तादृशी स्थिति: नासीत्। एकस्मिन्नेव वर्गे आर्य: अनार्यश्च उभौ अभवताम्। आचारवन्त: आर्या: आचाररहिता: अनार्या: इति यावत्। सर्वत्र सदाचार: प्रशंसित:। अनेनैव प्रकारेण आर्यधर्म: सर्वत्र प्रचारयितुं प्रयास: विहिता आसीत्।

महाभारतम् **'कृण्वन्तु विश्वमार्यम्'** इति वेदवाक्यस्य अनुपालनम् कुर्वन् कथामाध्यमेन सदाचारस्य शिक्षां ददाति। अयं ग्रन्थ: सदाचारस्य विश्वकोश: वर्तते। महाभारतग्रन्थोक्तं सदाचारस्य अनुपालनं कृत्वा मानव: समाज: देश: वा निश्चयेन महान् भवितुं शक्नोति। वस्तुत: सदाचार: एव मानवं महामानवं करोति।

## सन्दर्भ ग्रन्थ


1. मनुस्मृतिः- 2. 12
2. मनुस्मृति: 2.17-18
3. महाभारतम् अनुशासन पर्व 104.19
4. महाभारतम् अनुशासन पर्व 162.34
5. महाभारत अनुशासन पर्व- 162.25
6. महाभारतम, शान्ति पर्व, अध्याय 230
7. महाभारतम, शान्ति पर्व, अध्याय 205-208
8. महाभारतम, शान्ति पर्व, अध्याय 312
9. महाभारतम, शान्ति पर्व, अध्याय 210
10. महाभारतम, शान्ति पर्व, अध्याय 108.3-9
11. महाभारतम, वन पर्व, अध्याय 260.1